2

सुग्रीवमित्रं परमं पवित्रं सीताकलत्रं नवमेघगात्रम्
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं सततं नमामि ॥
संसारसारं निगमप्रचारं धर्मावतारं हृतभूमिभारम्
सदानिर्विकारं सुखसिन्धुसारं श्रीरामचन्द्रं सततं नमामि ॥
लक्ष्मीविलासं ~~भुवनप्रकाशं~~ जगतोनिवासं भूदेववासं
शरदिन्दुहासम्
लङ्काविनाशं भुवनप्रकाशं श्रीरामचन्द्रं सततं नमामि ॥
मन्दारमालं वचनेरसालं गुणैर्विशालं हतसप्ततालम्
क्रव्यादकालं सुरलोकपालं श्रीरामचन्द्रं सततं नमामि ॥
वेदान्तमानं सकलेसमानं हृतारिमानं त्रिदशप्रधानम्
गजेन्द्रयानं विकलावसानम् श्रीरामचन्द्रं सततं नमामि ॥
श्यामाभिरामं नयनाभिरामं गुणाभिरामं वचसाभिरामम्
विश्वप्रणामं कृतभक्तकामं श्रीरामचन्द्रं सततं नमामि ॥
लीलाशरीरं रणरङ्गधीरं विश्वैकवीरं रघुवंशहारम्
गम्भीरनादं जितसर्ववादं श्रीरामचन्द्रं ~~सततं~~ नमामि ॥
खलेकृतान्तं स्वजनेविनीतं सामोपगीतं ~~मनसा~~ प्रतीतम्
रागेणगीतं वचनादतीतं श्रीरामचन्द्रं सततं नमामि ॥
ब्रह्मादिदैव्यसेव्याय ब्रह्मण्याय महात्मने
जानकीप्राणनाथाय रघुनाथाय मङ्गलम् ॥

கஸ்தூரி திலகம் லலாடபலகே வக்ஷஸ்தலே கௌஸ்துபம்
நாஸாக்ரே நவமௌக்திகம் கரதலே வேணும் கரே கங்கணம்
ஸர்வாங்கே ஹரி சந்தனஞ்ச கலயம் கண்டே ச முக்தாவளிம்
கோபஸ்த்ரீ பரிவேஷ்டிதோ விஜயதே கோபால சூடாமணி